# Shri Vyasa Namavali Stotram

# श्रीव्यासनामावलीस्तोत्रम्

## Document Information

Text title : Shri Vyasa Namavali Stotram

File name : vyAsanAmAvalIstotram.itx

Category : deities_misc, gurudev

Location : doc_deities_misc

Transliterated by : Krishnananda Achar

Proofread by : Krishnananda Achar

Latest update : May 15, 2020

Send corrections to : sanskrit@cheerful.com


This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**


Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 31, 2020

*sanskritdocuments.org*

# श्रीव्यासनामावलीस्तोत्रम्

ईशिता श्रुतिभर्ताच भुवन प्रभुरेव च ।
जगद्गुरुः सद्गुरुश्च मुनिवंशस्य शेखरः ॥ १॥

भगवत्तमो वेदराट् च तथा सत्यवतीसुतः ।
श्रुतीश्वरो नीलभाश्च पाराशर्यो महाप्रभुः ॥ २॥

वेदव्यासः सत्पतिश्च द्विजेन्द्रान्वयजस्तथा ।
जगत्पिताजितश्चैव मुनीन्द्रोवेदनायकः ॥ ३॥

देवतापूज्यचरणश्चाम्नायानां सुपालकः ।
भारतानां वरगुरुः ब्रह्मसूत्रप्रणायकः ॥ ४॥

द्वैपायनो मध्वनाथो ज्ञानसूर्यः सदिष्टदः ।
विद्यापतिः श्रुतिपतिः विद्याराजो गिरां प्रभुः ॥ ५॥

विद्याधिराजो वेदेशस्तथा वेदपतिः स्वभूः ।
विद्याधिनाथो वेदराट् तथाम्नाय विकासकः ॥ ६॥

विद्याधीशः श्रुतीशश्च श्रुतिपङ्कज भास्करः ।
कृष्णद्वैपायनो व्यासो भक्तचिन्तामणिस्तथा ॥ ७॥

महाभारत निर्माता कवीन्द्रो बादरायणः ।
स्मृतिमात्रार्तिहा चैव भक्तवित्रासहा तथा ॥ ८॥

विश्ववेत्ता विश्वपतिर्भक्ता ज्ञान विनाशकः ।
विघ्नौघध्वान्ततरणिर्विघ्नाटव्याश्च हव्यवाट् ॥ ९॥

विघ्नव्याल विपश्चैव विघ्नौघ घन मारुतः ।
विघ्नर्भ पञ्चाननश्च विघ्नपर्वत सत्पविः ॥ १०॥

विघ्नाब्धिकुम्भजश्चैव विघ्नतूल सरागतिः ।
बादरिजैमिनिश्चैव सुमन्तुर्वैशम्पायनः ॥ ११॥

आत्मरथ्यश्च पैलश्च काशकृत्स्नश्च लोमशः ।
कार्ष्णाजनिश्चौडुलोमिरात्रेयो रोमहर्षणः ॥ १२॥

इत्येते मुनयः शिष्या यस्यासौ मुनिशेखरः ।
ब्रह्माद्यैः प्रार्थितो विष्णुः सत्यवत्यां पराशरात् ॥ १३॥

प्रादुर्भूतो व्यासरूपी वेदोद्धारकस्तथा ।
विज्ञानरोचिषा पूर्णो ब्रह्माण्डान्तर्बहिस्तथा ॥ १४॥

योगिमानस कञ्जस्थः हरितोपलसन्निभः ।
भक्ताज्ञान सुसंहारी तर्क मुद्रायुतः करे ॥ १५॥

दक्षिणे भवभीतानां भवनाशाय मुद्रया ।
अभयाख्यया युतः सव्ये करे सन्मङ्गलप्रदः ॥ १६॥

प्राज्ञमौलिश्च पुरुधीः सुखकान्तिर्विबोध भाः ।
शतेन्द्वधिक सत्कान्तिरयोग्य जनमोहकः ॥ १७॥

शुक्लरक्त विदूरश्च ब्रह्माद्यैर्वर्णमानिभिः ॥

संस्तुतानन्द सुगुणो योगीन्द्रः पद्मजार्चितः ॥ १८॥

आचार्यवर्यो विप्रात्मा पापनाशननामवान् ।
वेदान्तकर्ता भक्तानां कविताधिगुणप्रदः ॥ १९॥

वादे विजयदश्चैव रणे च विजयप्रदः ।
कीटराज्यप्रदः कीटमोक्षदाता च सत्प्रभुः ॥ २०॥

आम्नायोद्धारकश्चैव तथा सत्पुरुवंशकृत् ।
मुनेः शुकस्य जनको जनकस्योपदेशकः ॥ २१॥

मातुः स्म्यत्यैवागमन वरदातेश्वरेश्वरः ।
यमुनाद्वीप सुजनिर्यमुनाद्वीप भासकः ॥ २२॥

मात्राज्ञापालनार्थाय भगवान् पुरुषोत्तमः ।
धृतराष्ट्र पाण्डु विदुरजनको ज्ञानदस्तथा ॥ २३॥

उग्ररूपः शान्तरूपोचिन्त्यशक्तिः परात्परः ।
पाण्डवानां दुःखहन्ता तथापरिमितान्तरः ॥ २४॥

हिडिम्बासङ्गहार्ताय भीमाज्ञा संप्रदायकः ।

शाक्तः कानीन इन्द्रश्च शास्त्रकृद्धरिरेव च ॥ २५॥

द्विषामज्ञानपापानामतिसङ्क्रामकस्तथा ।
कर्म बन्ध सुभेत्ता च मुक्तानां स्वात्मवाहकः ॥ २६ ॥

वासवी हृदयानन्द वेदशास्त्र प्रणायकम् ।
वेदव्यासं गुरूपास्यं वन्देभिष्टप्रदायकम् ॥ २७॥

(न्यायामृत प्रकाशः)

इति श्रीबिदरहळ श्रीनिवासतीर्थकृतं श्रीव्यासनामावलिस्तोत्रं सम्पूर्णम् ।

Encoded and proofread by Krishnananda Achar

*Shri Vyasa Namavali Stotram*

pdf was typeset on May 31, 2020

Please send corrections to *sanskrit@cheerful.com*